শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রীমদ্ভাগৱতপুরাণান্তর্গতং

# ॥শ্রীকূর্মস্তোত্রম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

# ॥ শ্রীকূর্মস্তোত্রম্ ॥

দেৱা ঊচুঃ

নমাম তে দেৱ পদারৱিন্দং
প্রপন্নতাপোপশমাতপত্রম্।
যন্মূলকেতা যতযোঞ্জসোরু
সমসারদুঃখং বহিরুতক্ষিপন্তি॥ ১ ॥

ধাতর্যদস্মিন্ ভৱ ঈশ জীৱাঃ
তাপত্রযেণোপহতা ন শর্ম।
আত্মল্লভন্তে ভগৱংস্তৱাঙঘ্রি-
চ্ছাযাং সৱিদ্যামত আশ্রযেম॥ ২ ॥

মাগন্তি যত্তে মুখপদ্মনীডৈঃ
ছন্দঃসুপর্ণৈরৃষযো ৱিৱিক্তে।
যস্যাঘমর্ষোদসরিদ্বরাযাঃ
পদং পদং তীর্থপদঃ প্রপন্নাঃ॥ ৩ ॥

যচ্ছ্রদ্ধযা শ্রুতৱত্যা চ ভক্ত্যা
সংমৃজ্যমানে হৃদযেৱধায।
জ্ঞানেন ৱৈরাগ্যবলেন ধীরা
ৱ্রজেম তত্তেঙঘ্রিসরোজপীঠম্॥ ৪ ॥

ৱিশ্বস্য জন্মস্থিতিসম্যমার্থে
কৃতাৱতারস্য পদাম্বুজং তে।
ৱ্রজেম সর্ৱে শরণং যদীশ
স্মৃতং প্রযচ্ছত্যভযং স্বপুংসাম্॥ ৫ ॥

যতসানুবন্ধেসতি দেহগেহে
মমাহমিত্যূঢদুরাগ্রহাণাম্।
পুংসাং সুদূরং ৱসতোপি পুর্যাং
ভজেম তত্তে ভগৱন্ পদাব্জম্॥ ৬ ॥

www.prapatti.com

তান্ ৱৈ হ্যসদ্ৱৃত্তিভিরক্ষিভির্যে
পরাহৃতান্তর্মনসঃ পরেশ।
অথো ন পশ্যন্ত্যুরুগায নূনং
যে তে পদন্যাসৱিলাসলক্ষ্ম্যাঃ॥ ৭ ॥

পানেন তে দেৱ কথাসুধাযাঃ
প্রৱৃদ্ধভক্ত্যা ৱিশদাশযা যে।
ৱৈরাগ্যসারং প্রতিলভ্য বোধং
যথাঞ্জসান্ৱীযুরকুণ্ঠধিষ্ণ্যম্॥ ৮ ॥

তথাপরে চাত্মসমাধিযোগ-
বলেন জিত্বা প্রকৃতিং বলিষ্ঠাম্।
ত্বামেৱ ধীরাঃ পুরুষং ৱিশন্তি
তেষাং শ্রমঃ স্যান্ন তু সেৱযা তে॥ ৯ ॥

তত্তে ৱযং লোকসিসৃক্ষযাদ্য
ত্ৱযানুসৃষ্টাস্ত্রিভিরাত্মভিঃ স্ম।
সর্ৱে ৱিযুক্তাঃ স্ৱৱিহারতন্ত্রং
ন শক্নুমস্তত্প্রতিহর্তৱে তে॥ ১০ ॥

যাৱদবলিং তেজ হরাম কালে
যথা ৱযং চান্নমদাম যত্র।
যথোভযেষাং ত ইমে হি লোকা
বলিং হরন্তোন্নমদন্ত্যনূহাঃ॥ ১১ ॥

ত্বং নঃ সুরাণামসি সান্ৱযানাং
কূটস্থ আদ্যঃ পুরুষঃ পুরাণঃ।
ত্বং দেৱ শক্ত্যাং গুণকর্মযোনৌ
রেতস্ত্ৱজাযাং কৱিমাদধেজঃ॥ ১২ ॥

ততো ৱযং সত্প্রমুখা যদর্থে
বভূৱিমাত্মন্ করৱাম কিং তে।
ত্বং নঃ স্ৱচক্ষুঃ পরিদেহি শক্ত্যা
দেৱ ক্রিযার্থে যদনুগ্রহাণাম্॥ ১৩ ॥

॥ ইতি শ্রীকূর্মস্তোত্রং সংপূর্নম্ ॥

www.prapatti.com